CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
S. D. P. 13
Coll. No. 229

Title Tantra - a work on

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 228 Subject: Tantric Ritual

Title: A work on tantra

Author: — Scribe: —

Date of the work: — Date of the Ms.: —

Place of the work: — Place of the Ms.: —

Size: 7·3" x 4·4" Extent: 7 foll.

Language: Sanskrit. Script: Devanagari

Remarks: Seems complete.

॥श्री॥ देवीदक्षिणे अस्त्राय फट् इति प्रक्षाल्य मूलेन
जलेनापूर्य गंधपुष्पाक्षतपूजितं कुंभं निदध्यात्॥ त
तस्य वामे त्रिकोणषट्कोणवृत्तचतुरस्रं मंडलं भगोम
येन जलेन रक्तचंदनादिना वा लिख्य॥ शंखमुद्रय
वा अवष्टभ्य॥ ॐ मंडलेभ्यो नम इति पुष्पाक्षतैः संपूज्य॥
तत्राहं स्वे लिखितां त्रिपादिकां संस्थाप्य तस्यां मंवह्नि

मंडलायदशकलात्मनेमहाअमुकदेवतासामान्यार्घ्य
पात्राधारायनमः॥इतिसंपूज्य॥ॐक्लींमहाजल
चरायास्त्रायफट्स्वाहापांचजन्यायनमइतिमंत्रे
णशंखंप्रक्षाल्यआधारपात्रसंस्थाप्य।तस्मिन्॥
संस्तर्यमंडलायद्वादशकलात्मनेदेवीसामान्यार्घ्य
पात्रायनमः॥इतिसंपूज्य॥मूलेनतच्चरेत्सुधाबु

ध्यातोयंसंपूर्य॥गंगेचयमुनेचेतिक्रौंमित्यंकुश
मुद्रयासूर्यमंडलात्तीर्थान्यावाह्य॥मूलेनमहा
अमुकदेवताइहागच्छागच्छेतिइहतिष्ठत्वदेवताः॥
समावाह्यषडंगेनसकलीकृत्यगंधपुष्पाभ्यांदेवीः
संपूज्य॥हुमित्यवगुंठ्य।मत्स्यमुद्रयाछाद्यमूलेनअ
ष्टधाभिमंत्रयेदिति॥इतिसामान्यार्घ्यः॥ततः

सामान्यार्घ्यपात्रदक्षिणेपीठात्मनोर्मध्येन्तरगतत्वात्तुः
सामान्यार्घतोयेन मत्स्यमुद्रया च।बिंदुत्रिकोणष
I ट्कोणवृत्तचतुरस्रं मंडलं कृत्वा॥ मूलेन।बिंदुबीज
त्रयेण त्रिकोणं।षडंगेन षट्कोणं॥ मातृकया वृ २
त्तं। मूलेन चतुरस्रं च संपूज्य॥ तत्रास्त्रक्षालितां वि
शेषार्घ्यपात्राधारायनमः संस्थाप्य तस्यां मंवह्निमंड

लायदशकलात्मने। अमुकदेवताय।विशेषार्घ्य
पात्राधारायनमः॥ इतिसंपूज्य॥ तस्यां पूर्वा
दितः॥ ईयं धूम्रार्चिषे नमः॥१॥ रं ऊष्मायै०
॥२॥ लं ज्वलिन्यै०॥३॥ वं ज्वालिन्यै०॥४॥ शं
I विस्फुलिंगिन्यै०॥५॥ षं सुश्रियै०॥६॥ सं
सुरूपायै०॥७॥ हं कपिलायै०॥८॥ ळं हव्यवाहायै०

हें कव्यवाहायै नमः ॥१०॥ इति संपूज्य ॥ तत्र
त्रिकोणषट्कोणवृत्तचतुरस्रमंडलानि वि
ताव्य ॥ बीजत्रयेण त्रिकोणे संपूज्य ॥
ऐं हृदयाय नमः ॥१॥ क्लीं शिरसे० ॥२॥
सौः ॥ शिखायै० ॥३॥ ऐं कवचाय हुं ॥४॥ क्लीं
नेत्रत्रयाय वौषट् ॥५॥ सौः अस्त्राय फट् ॥६॥

एताव ॥ वह्निदशकलाद्यता सर्वधर्मफलप्र
दाः ॥ एता निस्सहितो रक्षेत्कुर्याद्विस्थानरोममम ॥१॥
पुष्पांजलिं दत्वा ॥ षट्कोणेन षडंगं ॥ वृत्तं मातृ
कया ॥ अं आं इत्यादि ॥ मूलेन चतुरस्रे ॥ संपूज्य ॥
तत्रास्त्रक्षालितां अर्घ्यपात्रं ॥ अं सूर्यमंडला
य द्वादशकलात्मने अमुकदेवतात्मने विश ।

षार्घ्यपात्रायनमःइतिसंस्थाप्य॥तस्मिंपूर्वादितः
॥ॐकंभंतपिन्यै०॥१॥ॐखंबंतापिन्यै०॥२॥ॐगंफं
धूम्रायै०॥३॥ॐघंपंमरीच्यै०॥४॥ॐङंनंज्वालिन्यै०
॥५॥ॐचंधंरुच्यै०॥६॥ॐछंदंसुषुम्णायै०॥७॥ॐजं
थंभोगदायै०॥८॥ॐझंतंविश्वायै०॥९॥ॐञंणंबो
धिन्यै०॥१०॥ॐटंढंधारिण्यै०॥११॥ठंडंक्षमायै०॥ ४

एताकलास्तुसूर्यस्यसूर्यमंडलसंस्थिताः॥
एताभिःसहितोरक्षमाऽऽदित्यःकुरुतांमम॥२॥
इतिपुष्पांजलिंदत्वा॥पात्रमध्येएवंविधंयंत्रंविभाव्य
एवंवसंपूज्य॥बीजत्रयेणत्रिकोणंसंपूज्य॥
षडंगेनषट्कोणं॥ऐंहृदयायनमःहृदयदे
वतांपूजयामि॥१॥क्लींशिरसेस्वाहाशिरसि

देवतांपूजयामि॥ सौंः शिखायैवौषट्
शिखा देवतांपूज०॥ ऐंकवचायहुंकव
चदेवतांपू०॥ क्लीं नेत्रत्रयावौषट् नेत्र
देवतांपू०॥ सौंः अस्त्रायफट् अस्त्रदेव
तांपूज०॥ ६॥ षट्कोणे॥ मातृकयावृत्ती॥
मध्येन चतुरस्रं संपूज्य॥ तत्रास्त्र क्षालि

तमर्घ्यपात्रं॥ अंसूर्यमंडलायद्वादशक
लात्मनेअमुकदेवदेताभ्यो० विशेषार्घ्य
पात्रायनमः॥ इतिसंस्थाप्य॥ तस्मिन्
पूर्वादितः॥ कंभंतपिन्यै०॥ १॥ खंबंतापिन्यै०
॥ २॥ गंफंधूम्रायै०॥ ३॥ घंपंमरीच्यै०॥ ४॥ ङंनं
ज्वालिन्यै०॥ ५॥ चंधंरुच्यै०॥ ६॥ छंदंसुषुम्नायै

यै०॥७॥ जं थं भोगदायै०॥८॥ झं तं विश्वायै०॥
९॥ अं णं बोधिन्यै०॥१०॥ टं ढं धारिण्यै०॥११॥ ढं
डं क्षमायै०॥१२॥ एताः कलास्तु सूर्यस्य सू
र्यमंडलसंस्थिताः॥ एताभिः सहितो रक्ष
मादित्यः मादित्यः कुरुते मम॥१॥ इति सौ
रीः कलाः संपूज्य॥ पात्रमध्ये पूर्ववद्यं ह्रां वि

भाव्य पूर्ववत्संपूज्य॥८ क्षं लं तं सं षं शं वं लं रं
यं मं भं बं फं पं नं धं नं दं थं तं णं ढं डं ठं टं भं
झं जं छं चं ङं घं गं खं कं अः अं औं ओं ऐं एं ॡं
ॡं ऌं ॠं ऋं ऊं उं ईं इं आं अं नमः॥ इति ल्नी
ममात्कं कया मूलं वा रु एवं बीजं च पूर्णत्वा॥
त्रिकोणकारेणं तु रीयां रांजलमापूर्यणं॥